# Manīṣa – A Research Journal of Sanskrit
## (DOUBLE-BLINDED PEER REVIEWED JOURNAL)
## (Vol. -VI, No.-1)
## (ISSN : 2583-2271)

गतवर्षमिव अस्मिन्नपि वर्षे सबं-सजनीकान्तमहाविद्यालयस्य स्नातकोत्तरसंस्कृतविभागपक्षतः मनीषाख्या वार्षिकी विशेषज्ञसमीक्षिता (Peer Reviewed) ई-शोधपत्रिका प्रकाशतां यास्यति। एतदर्थं सुरभारतीसमुपासकेभ्यः संस्कृतसम्बन्धि मौलिकं शोधपत्रं सम्प्रार्थ्यते।

**पत्रप्रेषणस्य अन्तिमदिवसः –** **३१.०८.२०२६**

**ईसंकेतः –** manisha@sabangcollege.ac.in

**मनीषाख्यायाः शोधपत्रिकाया विषये किञ्चित्.......**

भारतवर्षस्य निधिभूतं संस्कृतवाङ्मयं मनुजसमाजस्य कल्याणकारीति सर्वविदितं वर्तते। धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयस्य साधने मार्गदर्शकरूपेण सृष्टेरादिकालादेव वाङ्मयमिदं दृश्यते। राष्ट्रियैकतासम्पादने अस्य सर्वातिशायि महत्त्वं विद्यते। सबं-सजनीकान्तमहाविद्यालयस्य स्नातकोत्तरसंस्कृतविभागस्य संस्कृतविषयिणी वार्षिकी ई-शोधपत्रिका मनीषा प्रकाशयिष्यते। पत्रिकेयं प्रतिवर्षं निरवच्छिन्नतया प्रकाशतां गच्छति। "मनीषा" इति राष्ट्रियशोधपत्रिकायां भारतवर्षे विद्यमानेषु विविधविश्वविद्यालयमहाविद्यालयविद्यालयेषु कार्यरतानाम् आचार्योपाचार्यसहायकाचार्यगवेषकाणां विविधा मौलिकप्रबन्धाः निबद्धाः सन्तीति कृत्वा इयं राष्ट्रियत्वं सगौरवं निर्वहति।

**शोधपत्रिकाया अस्याः प्रकाशनोद्देश्यम्**

जीवने यथा भोजनवस्त्रनिवासादीनामावश्यकता भवति तथैव शिक्षाया अपि आवश्यकता वर्तते। भोजनादिकमस्माकं शारीरिकावश्यकतां पूरयति। शिक्षा च अस्माकं सामाजिकाध्यात्मिकावश्यकतां पूरयति। शिक्षयैव संस्काराः प्राप्यन्ते। शिक्षाहीनः जनः पशुभिः समानो भवति। भारतवर्षे विविधविश्वविद्यालये महाविद्यालये च कार्यरता विविधशास्त्रविशारदाध्यापकाः गवेषकाश्च स्वप्रतिभाबलेन अधीतशास्त्राणां रहस्यं सम्यग्बुद्ध्वा सरलसंस्कृतगिरा लेखान् विलिख्य अस्यां पत्रिकायां प्रकाशयितुं शक्नुवन्ति। अतः तेषां लेखकानां ज्ञानसौरभं समग्रे भारतवर्षे विद्यमानानां संस्कृतपाठकानां सविधे एतत्पत्रिकामाध्यमेन प्रसारितं भवति। एतेन संस्कृताध्येतॄणाम् अधीतशास्त्रेषु बोधविषयत्वं परिस्फुटं भवति। विदुषां छात्राणाञ्च विविधाः शोधलेखाः पत्रिकायाम् अस्याम् अन्तर्भवन्ति। अनेन नूनमेव पाठकानां ज्ञानवर्धनं यथा भविष्यति, तथैव जनाः ज्ञानार्जनाय प्रेरिता भविष्यन्तीति महतः प्रमोदस्यायं विषयः।

**लेखकानां कृते निर्देशावलिः**

- मनीषाख्यायां संस्कृतशोधपत्रिकायां संस्कृतसम्बन्धिविविधलेखानामेव प्रकाशनं भवति।
- अस्यां पत्रिकायां संस्कृतभाषायां देवनागरीलिप्यां च लिखिताः शोधप्रबन्धा एव गृहीता भवन्ति।
- प्रेषितेषु शोधलेखेषु विद्वद्भिः परीक्षिताः शोधलेखा एव स्वीकृता भवन्ति। लेखानां चयने संशोधने परिवर्धने च सम्पादकमण्डली एव प्रमाणम्।
- मनीषाख्यायां शोधपत्रिकायां प्रकाशनार्थं प्रेषिताः शोधलेखाः शुद्धाः, मौलिकाः, प्रामाणिकाः, अन्यत्र कुत्रचित् पूर्वम् अप्रकाशिताश्च स्युः। एतदर्थं लेखकाः प्रमाणपत्रमेकं प्रयच्छेयुः। **(शुद्धताप्रमाणपत्रप्रारूपं महाविद्यालयीयान्तर्जाले प्रदत्तमस्ति - https://www.sabangcollege.ac.in/Manisha-a-research-journal-of-sanskrit.aspx)**

- शोधप्रबन्धः २०००-२५००संख्यकैः शब्दैः लिखितः स्यात्।
- मनीषाख्यशोधपत्रिकायाः कृते शोधलेखस्य मूलप्रतिः प्रेषणीया। हस्तलिखितलेखाः छायाप्रतयश्च नैव स्वीक्रियन्ते। केवलं शुद्धटङ्किता लेखा एव गृह्यन्ते। A4-परिमिते पत्रे Unicode-आधारितदेवनागरीलिप्या (Sanskrit 2003, Shobhika Regular, Lohit Hindi, Adobe Devanagari etc) अधोनिर्दिष्ट-अक्षरमानेन टङ्किताः स्युः। पार्श्वसीमा प्रतिदिशं १-इञ्च् देया।
- प्रबन्धस्य अन्तिमे लेखकस्य नाम, वृत्तिः, सङ्केतः, दूरभाषक्रमाङ्कः, ई-मेलसङ्केतश्च अवश्यं लेखनीयम्।

**शोधलेखे अवश्यं देयाः अंशाः**

- शोधशीर्षकम् (यथासम्भवं लघु, विषयवस्तुबोधनसमर्थं च भवेत्) [अक्षरमानम् -१६]
- लेखकनाम [अक्षरमानम् -१४]
- प्रबन्धसारः (१५०-२००संख्यकैः अक्षरैः भवेत्) [अक्षरमानम् -१०, italics]
- कुञ्चीशब्दाः (पञ्च) [अक्षरमानम् -११]
- विषयः (भूमिकादिरूपेण सज्जितः स्यात्) [अक्षरमानम् -१२]
- बिन्दुः (Points) – [अक्षरमानम् -१२, **Bold**]
- सहायकग्रन्थसूची [अक्षरमानम् -१२]

**पादटिप्पणीनियमाः**

- वेद-उपनिषद्-रामायण-भगवद्गीता-महाभारत-पुराण-अष्टाध्यायीसूत्रग्रन्थादिभ्यः मन्त्राणां श्लोकानां सूत्राणां वा उद्धरणे तेषां पार्श्वे एव [वाल्मिकीयरामायणम् ५४/३०-३१] इत्येवंरूपेण लेखनीयम्।
- पङ्क्तीनामुद्धरणविषये ग्रन्थः टीकारूपश्चेत् पादटिप्पण्यां मूलग्रन्थेन साकं टीकाया नाम अपि उल्लेख्यम्। यथा-
  [१]कठोपनिषद् १-२-४ मन्त्रस्य शाङ्करभाष्यम्
- मूलग्रन्थेभ्यो यदि पङ्क्तयः स्वीक्रियन्ते तदा तद्ग्रन्थस्य नाम, अध्यायनाम, श्लोकसंख्यादिकं च प्रदेयम्।
- आधुनिकग्रन्थेभ्यो पङ्क्तीनामुद्धरणविषये तु ग्रन्थकारस्य नाम पृष्ठसंख्या च प्रदेया।
- पादटिप्पण्युक्तग्रन्थानां विस्तृतं विवरणं ग्रन्थसूचीमध्ये प्रदेयम्।

**ग्रन्थसूचीलेखननियमाः**

- ग्रन्थकारः। (प्रकाशनवर्षम्)। ग्रन्थस्य नाम। सम्पादकः। प्रकाशनस्थानम् : प्रकाशकः। यथा –
  भर्तृहरिः। (२००७)। वाक्यपदीयम् (ब्रह्मकाण्डम्)। खण्डूडी, सत्यनारायणः (सम्पा.)। वाराणसी : चौखम्बा संस्कृत संस्थान।

**लेखसम्बन्धिजिज्ञासा manisha@sabangcollege.ac.in इति ई-मेल्-सङ्केतमाध्यमेनैव प्रेषणीया।**

## यथासमयं लेखः प्रेषणीयः।

***इयं मनीषाख्या शोधपत्रिका ई-पत्रिका अस्ति। अत एतस्या मुद्रणं महाविद्यालयात् नैव क्रियते। लेखकैः अन्तर्जाले एव स्वकीयलेखाः द्रष्टुं शक्यन्ते। आवश्यकतानुसारं प्रकाशनप्रमाणपत्रं प्रदीयते।***

मनीषाख्यायाः शोधपत्रिकायाः विषये वैशद्येन ज्ञानाय अस्माकं जालपुटम् अवलोकयन्तु –

https://sabangcollege.ac.in/Manisha-a-research-journal-of-sanskrit.aspx

**डॉ. तपनकुमारदत्तः**

प्रधानसम्पादकः

मनीषा